# Shri Shivavibhakti Stotram

# श्रीशिवविभक्तिस्तोत्रम्

## Document Information

Text title : Shivavibhakti Stotram

File name : shivavibhaktistotram.itx

Category : shiva, ApaTIkara

Location : doc_shiva

Author : ma. sa. ApaTIkara

Transliterated by : Mandar Mali aryavrutta gmail.com

Proofread by : Mandar Mali aryavrutta gmail.com

Description/comments : stotrapanchadashI by Shri M. S. Apatikar, Satara

Source : Sharada year 11, Vol 21-22, September 1970

Acknowledge-Permission: Pt. Vasant A. Gadgil, Sharada Gaurava Granthamala, 425 Sadashv Peth, Pune 30

Latest update : September 14, 2019

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose. Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

**Please help to maintain respect for volunteer spirit.**

September 15, 2019

*sanskritdocuments.org*

Shri Shivavibhakti Stotram

# श्रीशिवविभक्तिस्तोत्रम्

(स्रग्विणी)

अव्ययः स्वस्तिदः शङ्करः पातु मां
ईश्वरस्त्र्यम्बकः सिद्धिदः पातु माम् ।
ऊर्ध्वरेताः शिवो धूर्जटिः पातु मां
भास्वरो भैरवो मुक्तिदः पातु माम् ॥ १॥

अष्टमूर्तिं शिवं विश्वनाथं हरं
भूतनाथं भवं वैद्यनाथं मृडम् ।
दक्ष-जामातरं यज्ञविध्वंसकं
भालनेत्रं सदा सादरं नौम्यहम् ॥ २॥

योगिना निर्मितं विश्वमेतत् पुरा
शम्भुना रक्षितं विश्वमेतत् सदा ।
शूलिना नाशिता आपदः प्राणिनां
सौख्यदं तं शिवं प्राञ्जलिः स्तौम्यहम् ॥ ३॥

शम्भवे स्थाणवे भिक्षवे योगिने
शूलिने धन्विने दैत्यहन्त्रे नमः ।
विश्वकर्त्रे नमो विश्वधर्त्रे नमो
विश्वसंहारिणे भक्तपात्रे नमः ॥ ४॥

वह्निनेत्रात्तथा सर्वभूतात्मनो
नीलकण्ठात्तथा शैलजावल्लभात् ।
वामदेवात्तथा दक्षयज्ञान्तकाद्
व्योमकेशात्परं दैवतं नापरम् ॥ ५॥

यज्ञसंहारिणः शूलिनः शार्ङ्गिणो
जाह्नवीधारिणो धन्विनो धूर्जटेः ।
अष्टमूर्तेस्तथा भानुकोटिद्युतेः

पादपद्मं सदा ध्यायते योगिभिः ॥ ६॥

ईश्वरे शङ्करे पार्वतीवल्लभे
त्र्यम्बके धूर्जटौ सर्वभूताधिपे ।
चन्द्रचूडे तथा व्याघ्रचर्मावृते
विश्वनाथे मनः सर्वदा लीयताम् ॥ ७॥

शूलपाणे विभो विश्वनाथ प्रभो
भस्ममन्दाकिनीभूषिताङ्ग प्रभो ।
अष्टमूर्ते विभो मुण्डमाल प्रभो
चन्द्रमौले विभो धुर्जटे पाहि माम् ॥ ८॥

विभक्तिरूपस्य सदाशिवस्य
स्तोत्रं सुरम्यं मनुजः पठित्वा ।
अनन्यचित्तेन प्रतिप्रभातं
कल्याणमाप्नोतु शिवप्रसादात् ॥ ९॥

इति श्री आपटीकरविरचितं श्रीशिवविभक्तिस्तोत्रं सम्पूर्णम् ।

Encoded and proofread by Mandar Mali aryavrutta gmail.com

*Shri Shivavibhakti Stotram*

pdf was typeset on September 15, 2019

Please send corrections to *sanskrit@cheerful.com*